# ॥ વસિષ્ઠ ગીતા ॥

.. VasiShTha gItA ..

sanskritdocuments.org

September 11, 2017

# .. VasiShTha gItA ..

# ॥ વસિષ્ઠ ગીતા ॥

## Sanskrit Document Information

Text title : vasiShThagItA

File name : vasishthagiitaa.itx

Category : gItA, giitaa, vAlmIki

Location : doc_giitaa

Author : Valmiki Maharamayana Yoga Vasishtha

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi(sunderh at hotmail.com), PSA Easwaran psaeaswaran at gmail.com

Description-comments : Vasishtha@s dialogue with Rama

Latest update : March 9, 2013

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

નિર્વાણ પ્રકરણ ઉત્તરાર્ધ સર્ગઃ ૩૯

॥ અથ વસિષ્ઠ ગીતા ॥

શ્રીવસિષ્ઠ ઉવાચ ।
સઞ્જાતાકૃત્રિમક્ષીણસંસૃતિપ્રત્યયઃ પુમાન્ ।
સઙ્કલ્પો ન સઙ્કલ્પં વેત્તિ તેનાસદેવ સઃ ॥ ૧॥

શ્વાસામ્લાનિરિવાદર્શે કુતોઽપ્યહમિતિ સ્થિતા ।
વિદિ સાઽકારણં દૃષ્ટા નશ્યન્ત્યાશુ ન લભ્યતે ॥ ૨॥

યસ્ય ક્ષીણાવરણતા શાન્તસર્વેહતોદિતા ।
પરમામૃતપૂર્ણાત્મા સત્તયૈવ સ રાજતે ॥ ૩॥

સર્વસન્દેહદુર્ધ્વાન્તમિહિકામાતરિશ્વના ।
ભાતિ ભાસ્વદ્ધિયા દેશસ્તેન પૂર્ણેન્દુનેવ ખમ્ ॥ ૪॥

વિસંસૃતિર્વિસન્દેહો લબ્ધજ્યોતિર્નિરાવૃતિઃ ।
શરદાકાશવિશદો જ્ઞેયો વિજ્ઞાયતે બુધઃ ॥ ૫॥

નિઃસઙ્કલ્પો નિરાધારઃ શાન્તઃ સ્પર્શાત્પવિત્રતામ્ ।
અન્તઃશીતલ આધત્તે બ્રહ્મલોકાદિવાનિલઃ ॥ ૬॥

અસદ્રૂપોપલમ્ભાનામિયં વસ્તુસ્વભાવતા ।
યત્સ્વર્ગવેદનં સ્વપ્નવન્ધ્યાપુત્રોપલમ્ભવત્ ॥ ૭॥

અવિદ્યમાનમેવેદં જગદ્યદનુભૂયતે ।
અસદ્રૂપોપલમ્ભસ્ય સૈષા વસ્તુસ્વભાવતા ॥ ૮॥

અસત્યેષ્વેવ સંસારેષ્વાસ્તામર્થઃ કુતો ભવેત્ ।
સર્ગાપવર્ગયોઃ શબ્દાવેવ વન્ધ્યાસુતોપમૌ ॥ ૯॥

જગદ્બ્રહ્મતયા સત્યમનિર્મિતમભાવિતમ્ ।
અનિશ્ચિતં ચાન્યથા તુ નાહં નાવગતં ચ તત્ ॥ ૧૦॥

આત્મસ્વભાવવિશ્રાન્તેરિયં વસ્તુસ્વભાવતા ।
યદહન્તાદિસર્ગાદિદુઃખાદ્યનુપલમ્ભતા ॥ ૧૧॥

ક્ષણાદ્યોજનલક્ષાન્તં પ્રાપ્તે દેશાન્તરે ચિતઃ ।
ચેતનેઽયસ્ય તદ્રૂપં માર્ગમધ્યે નિરઞ્જનમ્ ॥ ૧૨॥

અસ્પન્દવાતસદૃશં ખકોશાભાસચિન્મયમ્ ।
અચેત્યં શાન્તમુદિતં લતાવિકસનોપમમ્ ॥ ૧૩॥

સર્વસ્ય જન્તુજાતસ્ય તત્સ્વભાવં વિદુર્બુધાઃ ।
સર્ગોપલમ્ભો ગલતિ તત્રસ્થસ્ય વિવેકિનઃ ॥ ૧૪॥

સુષુપ્તે સ્વપ્નધીર્નાસ્તિ સ્વપ્ને નાસ્તિ સુષુપ્તધીઃ ।
સર્ગનિર્વાણયોર્ભ્રાન્તી સુષુપ્તસ્વપ્નયોરિવ ॥ ૧૫॥

ભ્રાન્તિવસ્તુસ્વભાવોઽસૌ ન સ્વપ્નો ન સુષુપ્તતા ।
ન સર્ગો ન ચ નિર્વાણં સત્યં શાન્તમશેષતઃ ॥ ૧૬॥

ભ્રાન્તિસ્ત્વસન્માત્રમયી પ્રેક્ષિતા ચેન્ન લભ્યતે ।
શુક્તિરૂપ્યમિવાસત્યં કિલ સમ્પ્રાપ્યતે કથમ્ ॥ ૧૭॥

યન્ન લબ્ધં ચ તન્નાસ્તિ તેન ભ્રાન્તેરસંભવઃ ।
સ્વભાવાદુપલમ્ભોઽન્યો નાસ્તિ કસ્ય ન કસ્યચિત્ ॥ ૧૮॥

સ્વભાવ એવ સર્વસ્મૈ સ્વદતે કિલ સર્વદા ।
અનાનૈવ હિ નાનેવ કિં વાદૈઃ સંવિભાવ્યતામ્ ॥ ૧૯॥

અસ્વભાવે મહદ્દુઃખં સ્વભાવે કેવલં શમઃ ।
ઇતિ બુદ્ધ્યા વિચાર્યાન્તર્યદિષ્ટં તદ્વિધીયતામ્ ॥ ૨૦॥

સૂક્ષ્મે બીજેઽસ્ત્યગઃ સ્થૂલો દૃષ્ટમિત્યુપપદ્યતે ।
શિવે મૂર્તે જગન્મૂર્તમસ્તીત્યુત્તમસંકથા ॥ ૨૧॥

રૂપાલોકમનસ્કારબુદ્ધ્યહન્તાદયઃ પરે ।
સ્વરૂપભૂતાઃ સલિલે દ્રવત્વમિવ ખાત્મકાઃ ॥ ૨૨॥

મૂર્તો યથા સ્વસદૃશૈઃ કરોત્યવયવૈઃ ક્રિયાઃ ।
આત્મભૂતૈસ્તથા ભૂતૈશ્ચિદાકાશમકર્તૃ સત્ ॥ ૨૩॥

આત્મસ્થાદહમિત્યાદિરસ્મદાદેરસંસૃતેઃ ।
શબ્દોઽર્થભાવમુક્તો યઃ પટહાદિષુ જાયતે ॥ ૨૪॥

યદ્ભાતં પ્રેક્ષયા નાસ્તિ તન્નાસ્ત્યેવ નિરન્તરમ્ ।
જગદ્રૂપમરૂપાત્મ બ્રહ્મ બ્રહ્મણિ સંસ્થિતમ્ ॥ ૨૫॥

યેષામસ્તિ જગત્સ્વપ્નાસ્તે સ્વપ્નપુરુષા મિથઃ ।

ન સન્તિ હ્યાત્મનિ મિથો નાસ્માસ્વમ્બરપુષ્પવત્ ॥ ૨૬॥

મયિ બ્રહ્મૈકરૂપં તે શાન્તમાકાશકોશવત્ ।
વાયોઃ સ્પન્દૈરિવાભિન્નૈર્વ્યવહારૈશ્ચ તન્મયિ ॥ ૨૭॥

અહં તુ સન્મયસ્તેષાં સ્વપ્નઃ સ્વપ્નવતામિવ ।
તે તુ નૂનમસન્તો મે સુષુપ્તસ્વપ્નકા ઇવ ॥ ૨૮॥

તૈસ્તુ યો વ્યવહારો મે તદ્બ્રહ્મ બ્રહ્મણિ સ્થિતમ્ ।
તે યત્પશ્યન્તિ પશ્યન્તુ તત્તૈરલમલં મમ ॥ ૨૯॥

અહમાત્મનિ નૈવાસ્મિ બ્રહ્મસત્તેયમાતતા ।
ત્વદર્થં સમુદેતીવ તથારૂપૈવ વાગિયમ્ ॥ ૩૦॥

અવિરુદ્ધવિરુદ્ધસ્ય શુદ્ધસંવિન્મયાત્મનઃ ।
ન ભોગેચ્છા ન મોક્ષેચ્છા હૃદિ સ્ફુરતિ તદ્વિદઃ ॥ ૩૧॥

સ્વભાવમાત્રાયત્તેઽસ્મિન્બન્ધમોક્ષક્રમે નૃણામ્ ।
કદર્થનેત્યહો મોહાદ્ગોષ્પદેઽપ્યુદધિભ્રમઃ ॥ ૩૨॥

સ્વભાવસાધને મોક્ષેઽભાવોપશમરૂપિણિ ।
ન ધનાન્યુપકુર્વન્તિ ન મિત્રાણિ ન ચ ક્રિયાઃ ॥ ૩૩॥

તૈલબિન્દુર્ભવત્યુચ્ચૈશ્ચક્રમપ્પતિતો યથા ।
તથાશુ ચેત્યસંકલ્પે સ્થિતા ભવતિ ચિજ્જગત્ ॥ ૩૪॥

જાગ્રતિ સ્વપ્નવૃત્તાન્તસ્થિતિર્યાદૃગ્રસા સ્મૃતૌ ।
તાદૃગ્રસાહંત્વજગજ્જાલસંસ્થા વિવેકિનઃ ॥ ૩૫॥

તેનૈવાભ્યાસયોગેન યાતિ તત્તનુતાં તથા ।
યથા નાહં ન સંસારઃ શાન્તમેવાવશિષ્યતે ॥ ૩૬॥

યદા યદા સ્વભાવાર્કઃ સ્થિતિમેતિ તદા તદા ।
ભોગાન્ધકારો ગલતિ ન સન્નપ્યનુભૂયતે ॥ ૩૭॥

મોહમહત્તારહિતઃ
    સ્ફુરતિ મૃતૌ ભવતિ ભાસતે ચ તથા ।
બુદ્ધ્યાદિકરણનિકરો
    યસ્માદ્દીપાદિવાલોકઃ ॥ ૩૮॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે
વાલ્મિકીયે દેવદૂતોક્તે મોક્ષોપાયે નિર્વાણપ્રકરણે
ઉત્તરાર્ધે વસિષ્ઠગીતાસુ સ્વભાવવિશ્રાન્તિયોગોપદેશો
નામૈકોનચત્વારિંશઃ સર્ગઃ ॥ ૩૯॥

॥ સર્ગઃ ૪૦ ॥

શ્રીવસિષ્ઠ ઉવાચ -
રૂપાલોકમનસ્કારબુદ્ધ્યાદીન્દ્રિયવેદનમ્ ।
સ્વરૂપં વિદુરમ્લાનમસ્વભાવસ્ય વસ્તુનઃ ॥ ૧॥

અસ્વભાવતનુત્વેન સ્વભાવસ્થિતિરાતતા ।
યદોદેતિ તદા સર્ગો ભ્રમાભઃ પ્રતિભાસતે ॥ ૨॥

યદા સ્વભાવવિશ્રાન્તિઃ સ્થિતિમેતિ શમાત્મિકા ।
જગદ્દૃશ્યં તદા સ્વપ્નઃ સુષુપ્ત ઇવ શામ્યતિ ॥ ૩॥

ભોગા ભવમહારોગા બન્ધવો દૃઢબન્ધનમ્ ।
અનર્થાયાર્થસમ્પત્તિરાત્મનાત્મનિ શામ્યતામ્ ॥ ૪॥

અસ્વભાવાત્મતા સર્ગઃ સ્વભાવૈકાત્મતા શિવઃ ।
ભૂયતાં પરમવ્યોમ્ના શામ્યતાં મેહ તામ્યતામ્ ॥ ૫॥

નાત્માનમવગચ્છામિ ન દૃશ્યં ચ જગદ્ભ્રમમ્ ।
બ્રહ્મ શાન્તં પ્રવિષ્ટોઽસ્મિ બ્રહ્મૈવાસ્મિ નિરામયઃ ॥ ૬॥

ત્વમેવ પશ્યસિ ત્વન્ત્વં સત્ત્વં શબ્દાર્થજૃમ્ભિતમ્ ।
પશ્યામિ શાન્તમેવાહં કેવલં પરમં નભઃ ॥ ૭॥

બ્રહ્મણ્યેવ પરાકાશે રૂપાલોકમનોમયાઃ ।
વિભ્રમાસ્તવ સંજાતકલ્પાઃ સ્પન્દા ઇવાનિલે ॥ ૮॥

બ્રહ્માત્મા વેત્તિ નો સર્ગં સર્ગાત્મા બ્રહ્મ વેત્તિ નો ।
સુષુપ્તો વેત્તિ નો સ્વપ્નં સ્વપ્નસ્થો ન સુષુપ્તકમ્ ॥ ૯॥

પ્રબુદ્ધો બ્રહ્મજગતોર્જાગ્રત્સ્વપ્નદૃશોરિવ ।
રૂપં જાનાતિ ભારૂપં જીવન્મુક્તઃ પ્રશાન્તધીઃ ॥ ૧૦॥

યથાભૂતમિદં સર્વં પરિજાનાતિ બોધવાન્ ।
સંશામ્યતિ ચ શુદ્ધાત્મા શરદીવ પયોધરઃ ॥ ૧૧॥

સ્મૃતિસ્થઃ કલ્પનસ્થો વા યથાખ્યાતશ્ચ સંગરઃ ।
સદસદ્ભ્રાન્તતામાત્રસ્તથાહંત્વજગદ્ભ્રમઃ ॥ ૧૨॥

આત્મન્યપિ નાસ્તિ હિ યા
 દ્રષ્ટા યસ્યા ન વિદ્યતે કશ્ચિત્ ।
ન ચ શૂન્યં નાશૂન્યં
 ભ્રાન્તિરિયં ભાસતે સેતિ ॥ ૧૩॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે
વાલ્મિકીયે દેવદૂતોક્તે મોક્ષોપાયે નિર્વાણપ્રકરણે
ઉત્તરાર્ધે વસિષ્ઠગીતાસુ આત્મવિશ્રાન્તિકથનં
નામ ચત્વારિંશઃ સર્ગઃ ॥ ૪૦॥

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com
Proofread by PSA Easwaran psaeaswaran at gmail.com

.. VasiShTha gItA ..
Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996
on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*